# मुषितस्तथापि वरानने!!

सकृदेव यद्यपि लक्षितं मुषितस्तथापि वरानने।
सलिलं मया परिरक्षितं तृषितस्तथापि वरानने ।।१।।

घनसारचम्पकचन्दनं सुरतरुपुरन्दरनन्दनम्
किमहो मया न वशीकृतं छलितस्तथापि वरानने ।।२।।

सुखदा न पर्वनिशीथिनी कैरवकदम्बकदीपनी
प्रतितारकं नु शशीकृतं ग्लपितस्तथापि वरानने ।।३।।

वाते वहति ननु शीतले आह्लादिते जगतीतले
तव कायसौरभमादृतं क्षपितस्तथापि वरानने ।।४।।

श्रुतिसुखदरोदरगुञ्जनं स्वरपञ्चमैः पिककूजनम्
मृदु शिञ्जितं दयितीकृतं भ्रमितस्तथापि वरानने ।।५।।

क्व नु याचते मम याचना क्व नु वन्दते मम वन्दना
विनिवेदनं सततं कृतं क्षुधितस्तथापि वरानने ।।६।।

त्वयि कल्पितं विबुधार्चनं सौभाग्यमपि मणिकाञ्चनम्
त्वय्युपचितिर्विनिवेशिता वलितस्तथापि वरानने ।।७।।

शशिनं विहाय सुखं न ते कुमुदिनि! वदामि हिताय ते
तुहिनीकृतो विरहानलो ज्वलितस्तथापि वरानने ।।८।।

❀❀❀

Scanned with CamScanner